No. ४६२१

Title भविष्योत्तर पुराणे धारण पारण व्रतम्

Author ✗

Extent २ पत्रे Age सं. १९००

Subject पुराण माहात्म्यादि

धारणापारणाव्रतम् भविष्योत्तरपुराणे

४६२१

4621

F. 2

एवंतरअनपत्र२त्रिः सविनादत्तागहा धरनांछे

पारलपारलपुन

३०

श्री॥ अथ चातुर्मास्ये एकादशीमारभ्य धारणपारणाव्रतं। भविष्योत्तरपुराणे॥ श्रीकृष्ण उवाच।
शृणु कौन्तेय वक्ष्यामि व्रतं धारणपारणं। येन धर्माद्विविधं दोषं सर्वेंद्रियनियामकं। चातुर्मास्ये ति
थावादौ मासि कौन्तेय सुव्रत। पुण्याहं वाचयेत्तत्र मेकादश्यां शुभे दिने। पश्चात्संकल्प्य राजेन्द्र तदा
स्य व्रतं चरेत्। आदौ मासि तिथावंते चातुर्मास्यमथापि वा। एकस्मिन्धारणं कार्यं पारणं च तथापरे।
भोजनं तत्र च उपवासो धारणं स्यात्पारणं भोजनं प्रवदेत्। पारणाद्यादिने प्राप्ते अर्घ्यं पूर्वं निवेदयेत्। पारणां तु त
तः कार्यं मंत्रमष्टाक्षरं जपेत्। अष्टोत्तरशतं दद्यादर्घ्यं देवाय तन्मनाः। समाप्ते मासि राजेन्द्र कुर्या
दुद्यापनं बुधः। चातुर्मास्यव्रती चापि मासे मासे तु कारयेत्। उपवासदिने प्राप्ते पुण्याहं वाचयेत्पु
रा। आचार्यं वरयेत्पश्चाद्ब्राह्मणं तु ततः परं। कुर्यात्तु प्रतिमां पश्चात् लक्ष्मीनारायणस्य वै।
पूर्णकुंभे तु तां स्थाप्य पूजयेन्निशि क्षितिप। पंचामृते स्तथा पुष्पैः तुलसीदलसंयुतैः। माल
तीकेतकी निम्बमल्लिका कुसुमैस्तथा। रात्रौ जागरणं कुर्यात्पुराणपठनादिभिः। प्रातः का

नेसमयात्ब्राह्मणांस्तु निमंत्रयेत्। मासेविप्रान्पंच स्याद्द्विमासेद्विगुणं भवेत्। चातुर्मास्येतथा

रुजनं तथाविंशति भूसुरान्। आनीयसंख्ययाराजन् ब्राह्मणांश्च निमंत्रयेत्। पश्चात्स्ना

नादिकं कृत्वा स्वपत्नीं समाचरेत्। पश्चादग्निंसमाधायहोमंकुर्याद्यथाविधि। निषीसीदतिमं

त्रेणजुहुयाच्चतिलोदनं। अराधिकाणे मंत्रेण जुहुयाच्च घृतोदनं। अष्टाक्षरेणमंत्रेणपायसं

जुहुयात्ततः। लक्ष्मीनारायणोदेवस्थानत्रयेपिदेवता। प्रथमं कृतं ततो कृत्वा होमशेषं समापये

त्। ब्राह्मणान्भोजयेत्पश्चादाचार्यं पूजयेत्ततः। एवं कृत्वा महाभाग ब्रह्महत्यादिपातकैः।

मुच्यते नात्रसंदेहस्तस्मात्कुरु महाव्रतं। सुग्रीवस्त्वपुराराजन्हत्वावालीनमाहवे। रामादि

ष्टुततोमत्वा कृत्वाधारणपारणं। विमुक्तस्तज्जनात्दोषात्तथान्यैःपातकैरपि। नारदोपि

तथाराजन्पूर्वजन्मनिमश्रुद्धः। द्विजेभ्य उपदेशास्त्व सम्यक्धारणपारणं। होमादिकं विनावापि

तस्यपुण्यप्रभावतः। जितेंद्रियस्ततो भूत्वा ब्रह्मन्नृषीनांवरः। तस्मात्सर्वप्रयत्नेन कुर्या

सर्वेशानी सच। अराधिकालो विश्वरेगिरिंगत सहान्वौं शिरिवि तस्य
सत्वत्रिःस्त्रैष्टुभा घातयामसि।

धारणपारणं। इंद्रियाणां वशार्थाय सर्वपापापनुत्तये। तस्मात्त्वमपि राजेंद्र कुरुष्व व्रतमुत्त
मं। क्लिद्यन्ते तपसा किंवा किमन्यैश्च व्रतैर्यमैः। धारणं पारणं कुर्याद्व्रतानामुत्तमं व्रतं। सर्व
यज्ञेषु वेदेषु सर्वतीर्थेषु यत्फलं। तत्फलं समवाप्नोति कृत्वा धारणपारणं। इदं व्रतं महापु
ण्यं तपसामुत्तमं तपः। यज्ञानां च तपायज्ञः व्रतानामुत्तमोत्तमं। तस्मात्त्वमपि राजेंद्र कु
र्विदं विधिपूर्वकं। बांधवादिवधैर्दोषैर्मुच्यते नात्र संशयः। इति तं संप्रज्ञाप्याथ विष्णुः
स्वां च पुरीं ययौ। दृश्यमानः पौरजनैः समस्तैः पांडुपुत्रकैः। युधिष्ठिरोपि राजर्षिश्चकार
इदं महाव्रतं। विमुक्तः सर्वपापेभ्यो वंशपापस्य ततोऽभवेत्।। इति भविष्योत्तरपुराणे धा
रणपारणव्रतं समाप्तं। सं० १८७ कार्त्तिक शुक्ल ५ सोमे लि। त्रि। गदाधरात्मज सवितादत्तेन।